दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-202 | 1 | मई 21, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८२,
कलियुगाब्धः ५१२६ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः ज्येष्ठकृष्णनवमी
ज्येष्ठ 7 प्रविष्टांशः मङ्गलमयः भवेत्


2 शिमलावार्ताः- पोर्टमोर विद्यालये शिक्षामन्त्रिणा राष्ट्रीयक्रीडासु पदकविजेतारः विद्यार्थिनः सम्मानिताः

3 10 जून दिनाङ्के शिपकी-लातः सीमापर्यटन- क्रियाकलापाः आरप्स्यन्ते, मुख्यमंत्री सुखविन्दरः सुक्खुः उद्घाटनं करिष्यति

4 बिहारम्- उपमुख्यमन्त्रिणा कृषिमन्त्रिणा च विजयकुमारसिन्हेन राज्यस्तरीयायाः शारदीयकृषि- कर्मशालायाः कृतम् उद्घाटनम्


## विदेश-सचिवः विक्रम-मिस्री सर्व-दलीय प्रतिनिधिमण्डलं सम्बोधितवान्,

### सिन्दूराभियान-विषये कूटनीतिक दृष्ट्या भारतेन विदेशं प्रति सर्वदलीय प्रतिनिधयः प्रेष्यन्ते



**हिमसंस्कृतवार्ताः** - विदेश-सचिवः विक्रम-मिस्री सर्व-दलीय-संसदः सदस्येभ्यः सूचनाम् अयच्छत्। अवधेयं वर्त्तते यत् सिन्दूराभियान-विषये कूटनीतिक-दृष्ट्या भारतेन विदेशं प्रति सर्वदलीय प्रतिनिधयः प्रेष्यन्ते। सर्वकारेण ऑपरेशन-सिन्दूर-प्रक्रमे पाकिस्तान प्रायोजित आतङ्कवादं विरुध्य भारतस्य नीतिं विचारं च विभिन्न देशेषु प्रचारयितुं सर्व-दलीय प्रतिनिधिमण्डलं प्रेषयिष्यते इति घोषणा भारतेन पूर्वमेव कृतास्ति। एतादृशं सप्तप्रतिनिधि-मण्डलं संयुक्तराष्ट्र-सुरक्षा-परिषदः सदस्यसमेतं प्रमुख सहभागि देशानां भ्रमणं करिष्यति। अवधेयं यत् एकोनषष्टि-सदस्य-युतं संसदीय प्रतिनिधि मण्डलं मईमासस्य त्रयोविंशतिदिनाङ्कात् जूनमासस्य प्रथमदिनाङ्क यावत् द्वाविंशति-देशानां भ्रमणं करिष्यति। प्रतिनिधिमण्डलम् अमेरिका-ब्रिटेन फ्रांस-जर्मनी-जापान-सऊदी अरब-ब्राजील-सहितेषु नैकेषु देशेषु भ्रमणं करिष्यति। मण्डलस्य नेतृत्वकर्तृषु सांसदेषु शशिधरूरः, रविशंकर प्रसादः, संजयझाः, बैजयंत पाण्डा, कनिमोझी करूणानिधिः, सुप्रिया सुले, श्रीकान्त सिन्दे च सम्मिलिताः सन्ति। प्रतिनिधिमण्डलेन आतङ्कवादं विरुध्य भारतस्य एकीकृतप्रवृतिः शून्य-सहनशीलता-भावस्य च नीतिः तत्र प्रसारयिष्यते।

### महाराष्ट्र-राष्ट्रवादी-कांग्रेसदलस्य वरिष्ठ नेता छगन भुजबलः मुम्बय्यां महायुति-प्रशासनस्य मन्त्रिरूपेण गोपनीयतायाः शपथं स्वीकृतवान्।

महाराष्ट्र-राष्ट्रवादी-कांग्रेसदलस्य वरिष्ठ नेता छगन भुजबलः मुम्बय्यां महायुति-प्रशासनस्य मन्त्रिरूपेण गोपनीयतायाः शपथं स्वीकृतवान्। राज्यपालेन सी पी राधाकृष्णनेन राजभवने तस्मै पद-गोपनीयतायाः शपथवचनं प्रतिज्ञापितम्। शपथ ग्रहण-समारोहे मुख्यमन्त्री देवेन्द्र फडणवीसः उप-मुख्यमन्त्रिणौ एकनाथ शिन्दे अजित पवारश्च उपस्थितौ आस्ताम्।

### राजस्थानस्य बीकानेरस्थिते देशनोक-स्थलाल् त्रयोत्तरैक-शतम् अमृत-भारत-स्थानकानाम् उद्घाटनं करिष्यति प्रधानमन्त्री नरेन्द्रमोदी




हिमसंस्कृतवार्ताः - प्रधानन्त्री नरेन्द्रमोदी गुरुवासरे राजस्थानस्य बीकानेरस्थिते देशनोक-स्थलाल् त्रयोत्तरैक-शतम् अमृत-भारत-स्थासनानाम् उद्घाटनं करिष्यति। अमृत-भारत-स्थासन-योजनायाः अन्तर्गतम् एतानि स्थासनानि आधुनिक-सौविध्य-युक्तानि विधाय सिटीसेंटर अर्थात् नगरकेन्द्र-रूपेण पुनः विकसितानि। अत्र क्षेत्रीय-संस्कृतिः रिक्थम् च प्रदर्शयिष्यन्ते।

### विदेशमन्त्री डॉ. एस. जयशङ्करः हेग नगरे नीदरलैण्ड-देशस्य प्रधानमन्त्रिणा डिक शूफ इत्यनेन सह मेलनम् अकरोत्

हिमसंस्कृतवार्ताः - विदेशमन्त्री डॉ. एस. जयशङ्करः हेग नगरे नीदरलैण्ड-देशस्य प्रधानमन्त्रिणा डिक शूफ इत्यनेन सह मेलनम् अकरोत्। सामाजिक-सञ्चार-पटले डॉ. जयशङ्करेण उक्त यत् मेलनावसरे तेन नीदरलैंड़देशस्य प्रधानमन्त्रिणे प्रधानमन्त्रिणः नरेन्द्र-मोदिनः पक्षतः हार्दिक शुभकामनाः प्रदत्ताः। अथ च आतङ्कवादं विरुध्य नीदरलैंड्स-राष्ट्रस्य दृढतायै तस्मै धन्यवादः अपि दत्तः। नीदरलैंड्स-देशस्य प्रधानमन्त्रिणा अप्रैल-मासस्य द्वाविंशे दिने पहलगामे दुरापादितस्य आतङ्क्याक्रमणस्य कठोर निन्दा कृतासीत्। आतङ्कवादस्य सर्वविधाभिव्यक्तयः निराकृताः। अवधेयं यत् विदेशमन्त्री नीदरलैंड्स डेनमार्क जर्मनी राष्ट्राणां षडदिवसीय यात्रारतो वर्तते।

### केन्द्रीय-कृषि-कृषक-कल्याण-मन्त्री शिवराज सिंह चौहानः अवदत् यत् सर्वकारस्य विशिष्टम् अवधानं विज्ञानाधारित-कृषि-परिवर्तनं संवर्धयितुं वर्तते



हिमसंस्कृतवार्ताः - केन्द्रीय-कृषि-कृषक-कल्याण-मन्त्री शिवराज-सिंहचौहानः कृषि विश्वविद्यालयस्य कुलपतीनाम् आचार्याणां छात्राणाञ्च राष्ट्रव्यापि-विकसित-कृषि-संकल्प-अभियाने सम्मेलितुं साग्रहम् आह्वानम् अकरोत्। इदं हि कृषि-संकल्प-अभियानम् अस्य मासस्य एकोनत्रिंशत्-दिनाङ्कात् आरप्स्यते। नवदेहल्यां कृषि विश्वविद्यालयानां कुलपतीनां भारतीय कृषि अनुसन्धान-परिषद्-संस्थानानां निदेशकानां सम्मेलनं सम्बोधयन् श्रीचौहानः अवदत् यत् सर्वकारस्य विशिष्टम् अवधानं विज्ञानाधारित-कृषि-परिवर्तनं संवर्धयितुं वर्तते। भारतीय-कृष्यनुसन्धान परिषद् कृषेः मन्दिरमिति अपि चौहानेन कथितम्। इयं परिषद् अनुसन्धानस्य दिशि कृषकाणां कृषि-विषयक-आवश्यकतानाञ्च समुचित प्रकारेण मार्गदर्शनं करोति।

### ब्राजील-देशे केन्द्रीय-विद्युत्-मन्त्रिणा मनोहर-लालेन ऊर्जा-सुरक्षा विषयेषु भारतस्य उपलब्धयः प्रदर्शिताः

हिमसंस्कृतवार्ताः - केन्द्रीय-विद्युत्-मन्त्रिणा मनोहर-लालेन ऊर्जा-सुरक्षा सम्प्रतिकेषु महत्त्वपूर्ण-समाह्वानेषु अन्यत-रूपेण रेखाङ्ङ्कितम्। ब्राजील-देशे ब्रिक्स-राष्ट्राणाम् ऊर्जा-मन्त्रिणाम् उपवेशने भारतीय-प्रतिनिधि-मण्डलस्य नेतृत्वं विद्धता तेन स्वच्छोर्जसः क्षेत्रे भारतस्य उपलब्धयः प्रदर्शिताः। श्रीमनोहर-लालेन ऊर्जसोत्पादनस्य विस्तारे नवीकरणीयोर्जसां अथ हरित-हाइड्रोजन इत्येतेषु संवर्धनाय भारतस्य दशवर्षाणां प्रगतिः प्रस्तुता। इदम् उपवेशनं ऊर्जासंवर्धने सतत् विकासे च समेकित निर्णयेन सह सम्पन्नम्।

## सुभाषितम्

**दानेन तुल्यं सुहृदस्ति नान्यो,**
**लोभाच्च नान्योऽस्ति रिपुः पृथिव्याम्।**
**विभूषणं शीलसमं न चान्यत्,**
**सन्तोषतुल्यं धनमस्ति नान्यत्॥**

भावार्थः- दान के समान अन्य कोई सुहृद (मित्र) नहीं है और पृथ्वी पर लोभ के समान कोई अरि (शत्रु) नहीं है। शील (चरित्र) के समान कोई आभूषण नहीं है और संतोष के समान कोई धन नहीं है।



प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp


**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**


कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११


### सीमा-सुरक्षा-बलेन घोषितं यत् पञ्जाब सीमां समेत्य त्रिषु संयुक्त सस्य-स्थानेषु बीटिंग रीट्रिट इति समारोहः पुनः आरभते



हिमसंस्कृतवार्ताः - सीमासुरक्षाबलम् ।सीम-सुरक्षा-बलेन घोषितं यत् पञ्जाब सीमां समेत्य त्रिषु संयुक्त सैन्य-स्थात्रेषु बीटिंग रीट्रिट इति समारोहः पुनः आरभते। सीमा-सुरक्षा-बलानुसारं समारोहे वार्ता-समवायानां कर्मिभ्यः विशेषरूपेण प्रवेशानुमतिः वर्तते। सामान्य-जनेभ्यः समारोहे प्रवेशानुमतिः भविष्यति। अवधेयम् अस्ति यत् अटारी, हुसैनीवाला सादकी चेति संयुक्त सैन्य-स्थानेषु बीटिंग रीट्रिट इति समारोहः अस्य माससस्य अष्टमे दिने सामान्य जनेभ्यः निरसितः आसीत्।

# शिमलावार्ताः- पोर्टमोर विद्यालये शिक्षामन्त्रिणा राष्ट्रीयक्रीडासु पदकविजेतारः विद्यार्थिनः सम्मानिताः




हिमसंस्कृतवार्ताः- डॉ. पदमनाभः, शिमला। राजकीय-आदर्श- वरिष्ठ- माध्यमिक-विद्यालये पोर्टमोर इत्यस्मिन् मङ्गलवासरे राष्ट्रियक्रीडासु विजयप्राप्तानां छात्राणां कृते सम्मानसमारोहस्य आयोजनम् अभवत्। अस्मिन् समारोहे शिक्षामन्त्री रोहितठाकुरमहोदयः उपस्थितः सन् विजयी छात्रान् सम्मानितवान्। तस्य पूर्वं शिक्षामण्डलस्य दशमीद्वादशी कक्षायाः वरीयतास्थानं प्राप्तवत्यः षट् छात्राः अपि सम्मानिताः। अस्य आयोजनं हिमाचल- विद्यालय-क्रीडासंघेन कृतम्।

ज्ञातव्यमस्ति यत् राष्ट्रियक्रीडायाः अष्टषष्टितमे संस्करणे हिमाचलराज्यस्य छात्रक्रीडकानां प्रदर्शनं अत्युत्तमं जातम्। एतासु क्रीडासु हिमाचलराज्यस्य छात्रैः अधीनम्-१७ तथा अधीनम्-१९ वर्गयोः ३३ पदकानि प्राप्तानि। एतेषु ३ स्वर्णपदकाः, ६ रजतपदकाः, २४ कांस्यपदकाः च समाविष्टाः सन्ति। राज्येन पदकविजेतारः छात्राः इदानीं सम्मानिताः।

समारोहे पोर्टमोरविद्यालयस्य छात्राभिः नाटीनृत्यस्य अद्भुतं प्रदर्शनं कृतम्। शिक्षामन्त्रिणा छात्राणां गायनं नृत्यं च अत्यन्तं प्रशंसितम्। तदा तेन स्वनामतः एताभ्यः छात्राभ्यः २००० रूप्यकाणां पुरस्कारः अपि घोषितः। सरकाघाट-उपमण्डलस्य भदरोता प्रदेशे स्थितस्य रिस्सा-विद्यालयस्य द्वादशीकक्षायाः छात्रः रोहितरावः अपि शिक्षामन्त्रिणा सम्मानितः जातः। एते छात्राः अपि पदकं विजित्य राज्यस्य गौरवं वर्धितवन्तः-

**मल्लयुद्धक्रीडायाम्-** सोलन-जनपदस्य लोधीमाजराविद्यालयात् प्रेमा मेहता, रिस्सा- विद्यालयस्य द्वादशीकक्षायाः छात्रः रोहितरावः, पंजेहरा विद्यालयात् हर्षिता, लोधीमाजरातः यादविन्द्रः, हमीरपुर-जनपदस्य ब्लू स्टार विद्यालयात् रजतकुमारः, मण्डीजनपदस्य सुन्दरनगरस्य राजकीयवरिष्ठमाध्यमिक-विद्यालयात् श्रेया वीर यादव, कावेरीविद्यालयात् (धनोट्रूमण्डी) शौर्यवीरः चौधरी च सम्मानिताः।

**तायक्वाण्डो क्रीडायाम्-** डीएवी दरकोटी विद्यालयात् सृष्टि ठाकुर।

**मुष्टिघात-क्रीडायाम् (बॉक्सिंग)-** किन्नौर-जनपदस्य कल्पा विद्यालयात् हर्षितकुमारः, ब्लूस्टार विद्यालयात् (हमीरपुर) निखिल कुमारः, कांगड़ा जनपदस्य सुजलः, मण्डी-राजगढ़ विद्यालयात् मोनिका शर्मा, सांजी मण्डी विद्यालयात् ध्रुव, ऊना-जनपदस्य पीएसएसएस पक्का परोह विद्यालयात् वरुण शर्मा, बिलासपुर-बालविद्यालयात् साहिलः, सुन्दरनगर-बालविद्यालयात् तुषारः, उर्नी विद्यालयात् (किन्नौर) विभूति नेगी, गर्ल्स विद्यालयात् (शिमला) सानिया राणा च सम्मानिताः।

**जूडो-क्रीडायाम्-** ब्लू स्टार विद्यालयात् कृतिका, कुठेड़ा विद्यालयात् (हमीरपुर) अंकिता ठाकुर।

**कराटे-क्रीडायाम्-** सोलन-कन्या विद्यालयात् दीपांशी धूली, देवठी विद्यालयात् (सोलन) गौरव शर्मा, कुशनगरी विद्यालयात् (चंबा) आदित्य ठाकुर, देहा विद्यालयात् (शिमला) अर्व हिमटा, कुल्लू- साई स्टार विद्यालयात् आर्यन, धर्मपुर-सोलन विद्यालयात् तानिया सैनी, कांगू विद्यालयात् (हमीरपुर) अक्षित ठाकुर, देवठी विद्यालयात् याशिका, डीएवी एसएसएस ऊना विद्यालयात् सार्थक, धवाल विद्यालयात् (मण्डी) सिद्धार्थ ठाकुरः।

**आर्टिस्टिक योगे-** सुपर मेगनेट पीएस विद्यालयात् (हमीरपुरं) निधि डोगरा।

**दलीयक्रीडायासु-** हिमाचलराज्येन अण्डर- १७ कन्यकाः हॉकीक्रीडायां, अण्डर- १९ कन्यकाः हैंडबॉल-क्रीडायां पदकं प्राप्तवन्त्यः, यत् राज्यस्य गौरवम् वर्धितम्।

# तुर्की-सेब-प्रतिबन्धस्य आग्रहः, संयुक्त- कृषकमञ्चेन राज्यपालाय ज्ञापनपत्रं प्रदत्तम्



हिमसंस्कृतवार्ताः - शिमला । संयुक्तकिसानमंचस्य प्रतिनिधिमंडलं शिमलायां राजभवने राज्यपालेन शिवप्रतापशुक्लमहोदयं मिलितवान्। मञ्चेन तुर्कीतः सेबफलस्य आयाते प्रतिबन्धं कर्तुं राज्यपालस्य माध्यमेन प्रधानमन्त्रिणे नरेन्द्रमोदिने ज्ञापनपत्रं प्रदत्तम्। मञ्चस्य संयोजकः हरीशचौहानः राज्यपालं सूचितवान् यत् भारतं सम्प्रति प्रायः ४४ देशेभ्यः सेबस्य आयातं करोति, येषु तुर्कीदेशः प्रतिवर्षं प्रायः १.२९ लक्षं मेट्रिकटनं सेबं भारतं प्रति निर्यातितं करोति। सः अवदत् यत् तुर्कीदेशः भारतं प्रति सेबनिर्यातात् प्रायः ८०० तः १,००० कोटिरूप्यकाणाम् आर्थिकलाभान् अर्जयति। हिमाचलप्रदेशे सेब-उद्योगस्य महत्त्वं प्रकाशयन् चौहानः अवदत् यत् राज्ये प्रतिवर्षं ६ तः १० लक्षं मीट्रिकटनपर्यन्तं सेबस्य उत्पादनं भवति तथा च प्रायः ३ तः ४ लक्षं परिवाराः अस्मिन् क्षेत्रे प्रत्यक्षतया निर्भराः सन्ति। सः अवदत् यत् तुर्कीदेशात् सेबस्य आयाते प्रतिबन्धः न केवलं राज्यस्य अर्थव्यवस्थां वर्धयिष्यति अपितु आतङ्कवादस्य समर्थनं कुर्वन्तः पाकिस्तानेन सह निकटसम्बन्धं धारयन्तः देशाः अपि दृढं सन्देशं प्रेषयिष्यति। राज्यपालः मञ्चस्य आग्रहस्य समर्थनं प्रकटयन् प्रतिनिधिमण्डलाय आश्वासनं दत्तवान् यत् तेषां ज्ञापनपत्रं राष्ट्रपतिनं प्रधानमन्त्रिणं च प्रेषितं भविष्यति। सः अवदत् यत् एषः विषयः राज्यस्य आर्थिकसमृद्ध्या सह प्रत्यक्षतया सम्बद्धः अस्ति, कृषकाणां, उद्यानपालकानां च हितस्य रक्षणं करणीयम् इति। अस्मिन् अवसरे राज्यपालसचिवः सी. पी. वर्मा अपि उपस्थितः आसीत्।

# Shimla News - संजौली मस्जिदस्य बहिः हनुमान-चालीसायाः पाठः, यदि शुक्रवासरस्य नमाजः भवति तर्हि महदान्दोलनस्य सचेतना



हिमसंस्कृतवार्ताः - शिमला। संजौली मस्जिदस्य अवैधसंरचनायाः ध्वंसनं कृत्वा हिन्दुसंस्थाः पुनः हिंसकाः अभवन् । मंगलवासरे सायं हिन्दुसंस्थाः संजौलीनगरे हनुमानचालीसायाः पाठान् कृतवन्तः तदनन्तरं मस्जिदं प्रति अपि गन्तुं प्रयतन्ते स्म, परन्तु मार्गे पुलिसबलं तान् अवरुद्धम्। देवभूमिसङ्घर्षसमितिः कथयति यत् मस्जिदस्य समीपे गणदेवतायाः स्थानं अस्ति अतः वयं तत्र गन्तुम् इच्छन्तः आसन्, परन्तु पुलिसैः अस्मान् तत्र गन्तुं निवारितम्। इदानीं मस्जिदे शुक्रवासरस्य नमाजः क्रियते तर्हि ते महत् आन्दोलनं कर्तुं बाध्यन्ते इति संस्था सचेतितवती।मस्जिदस्य ध्वंसनस्य आदेशः दत्तस्य कतिपयान् मासान् यावत् अभवत् अपि अद्यापि मस्जिदस्य विद्युत्-जल-संयोजनं न कटितम् इति हिन्दु-संस्थाः वदन्ति देवभूमि संघर्ष समित्याः सहसंयोजकः मदनठाकुरः राज्यसर्वकारस्य तथा पुलिसप्रशासनस्योपरि द्विविधं मानकं स्वीकर्तुं आरोपितवान्। सः कथयति यत् सः केवलं धार्मिकपाठं कर्तुम् इच्छति स्म, परन्तु प्रशासनम् अनावश्यकरूपेण तत् विवादास्पदं करोति।हनुमानचालीसापाठस्य कृते कार्यस्य चर्चा आसीत्, सः अनावश्यकरूपेण निरुद्धः अभवत्। ते वदन्ति यत् आगामिनि शुक्रवासरे मस्जिदे नमाजः क्रियते चेत् ते नगरं अवरुद्धं करिष्यन्ति। सः अवदत् यत् यदा मस्जिदः अवैधः इति घोषितः तदा तस्मिन् नमाजस्य अर्पणम् अपि प्रतिषिद्धं भवेत्।सः अवदत् यत् यथा अस्माकं पूर्वजैः हिमाचलं सुरक्षितरूपेण अस्माकं हस्ते समर्पितं तथा भविष्ये अपि तथैव सुरक्षितं तिष्ठेत्। वयं सर्वकाराद् अपि तथैव अपेक्षयामः। अस्मिन् अवसरे सः वस्तुविक्रयणस्य सत्यापनस्य आग्रहमपि उत्थापितवान्। सः अवदत् यत् अधिकांशः पथविक्रेतारः समुदायविशेषस्य सन्ति, ते ग्राम्यक्षेत्रेषु अपराधिककार्यं कुर्वन्ति। देवभूमिसङ्घटनस्य सहसंयोजकः विजयशर्मा अवदत् यत् मस्जिदस्य समीपे गणदेवतायाः स्थानम् अस्ति, वयं तत्र गन्तुम् इच्छामः परन्तु पुलिसबलम् अस्मान् निवारितम्। सः प्रशासनेन मस्जिदस्य अवैधसंरचना यथाशीघ्रं ध्वस्तं कर्तुं आग्रहं कृतवान्।

# 10 जून दिनाङ्के शिपकी-लातः सीमापर्यटन- क्रियाकलापाः आरप्स्यन्ते, मुख्यमंत्री सुखविन्दरः सुक्खुः उद्घाटनं करिष्यति



हिमसंस्कृतवार्ताः- शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः किन्नौरमण्डलस्य शिपकी-लातः २०२५ तमस्य वर्षस्य जूनमासस्य १० दिनाङ्के सीमापर्यटन- क्रियाकलापानाम् आरम्भं करिष्यति। अस्मिन् अवसरे मुख्यमन्त्री सद्भावनासाइकिलयात्रा इत्यस्य ध्वजं प्रदर्शयिष्यति। राज्यसर्वकारेण रक्षामन्त्रालयेन राज्यस्य सीमान्तक्षेत्रेषु लेप्चा, शिपकी- ला, गिउ, रानीकाण्डा इत्यत्र पर्यटनक्रियाकलापस्य अनुमतिः दातुम् अनुरोधः आसीत्, अस्मिन् विषये रक्षामन्त्रालयात् अनुमोदनं प्राप्तम्। एतेषु क्षेत्रेषु आगच्छन्तः पर्यटकाः स्वस्य आधारपत्राणि अधिकारिभ्यः दर्शयितुं प्रवृत्ताः भविष्यन्ति। तदनन्तरं ते एतेषां क्षेत्राणां प्राकृतिकं सौन्दर्यं द्रष्टुं शक्नुवन्ति। सीमाक्षेत्रेषु पर्यटनक्रियाकलापानाम् प्रचारार्थं सर्वकारस्य एषः उपक्रमः प्रभावी सिद्धः भविष्यति, येन स्थानीयजनानाम् अर्थव्यवस्था सुदृढा भविष्यति। अस्मिन् सन्दर्भे अस्मिन् वर्षे अप्रैलमासस्य १९ दिनाङ्के सेनायाः वरिष्ठाधिकारिभिः सह एकः समागमः अभवत्।मुख्यमन्त्रिणः अध्यक्षतायां अत्र सेनापदाधिकारिभिः, सीमामार्गसङ्घटनेन च सह उच्चस्तरीयं समागमं कृतवान्। सः अधिकारिभिः सह विभिन्नानां सीमाविकासपरियोजनानां समीक्षां कृत्वा एतासां परियोजनानां त्वरिततां कर्तुं निर्देशं दत्तवान् येन सीमाक्षेत्रेषु निवसन्तः जनाः सशस्त्रसेनाः च अधिकतमं लाभं प्राप्नुयुः। सः लोकनिर्माणविभागस्य सीमामार्गसङ्घटनस्य च अधिकारिभ्यः विकासात्मकपरियोजनानां शीघ्रं कार्यान्वयनार्थं समन्वयं स्थापयितुं निर्देशं दत्तवान्। मुख्यमन्त्री अवदत् यत् आगामिनि नवीदिल्लीयात्रायां सः हिमाचलस्काउट- वाहिन्याः स्थापनायाः प्रकरणं केन्द्रसर्वकारस्य समक्षं प्रस्तुतं करिष्यति। सः अवदत् यत् स्थानीययुवकाः क्षेत्रस्य भौगोलिकस्थित्या सुपरिचिताः सन्ति, अतः राज्यस्य सीमाक्षेत्रेषु कस्यापि परिस्थितेः निवारणे स्थानीययुवानां एतत् विशेषबलं महत्त्वपूर्णां भूमिकां निर्वहति। स्पीति उपत्यकायां रङ्गरीकक इत्यत्र विमानस्थानकं स्थापयितुं प्रकरणं अपि केन्द्रस्य समक्षं स्थापितं भविष्यति। सः क्षेत्रे प्रचलितानां विविधानां मार्गपरियोजनानां विषये चर्चां कृत्वा परियोजनानां समाप्त्यर्थं सर्वकारस्य पूर्णसमर्थनस्य आश्वासनं दत्तवान् बी.आर.ओ. इत्यस्मै सः अवदत् यत् -हर्षिल निथलाच-मार्ग-परियोजना रणनीतिकदृष्ट्या महत्त्वपूर्णा परियोजना इति घोषिता भविष्यति, एषा परियोजना प्राथमिकता-आधारेण कार्यान्विता भविष्यति। एतेन हिमाचलप्रदेशस्य उत्तराखण्डस्य च मध्ये उत्तमसंपर्कः सुनिश्चितः भविष्यति, येन पर्यटनं व्यापारं च वर्धयिष्यते।
मुख्यमन्त्री सीमामार्गसङ्गठनं संसारी- किलाड-थिरोत-तांदी-मार्गस्य निर्माणकार्यं शीघ्रं कृत्वा एतेषु क्षेत्रेषु निवसतां जनानां कृते उत्तममार्गसंपर्कस्य सुविधां प्रदातुं निर्देशं दत्तवान्। सः अवदत् यत् अस्याः परियोजनायाः ३५ प्रतिशतं कार्यं सम्पन्नम् अस्ति तथा च सीमामार्गसङ्घटनेन शीघ्रगत्या कार्यं कर्तव्यं यत् परियोजना शीघ्रमेव कार्यान्वितुं शक्नोति। मुख्यमन्त्री सेनापदाधिकारिणः हिमाचलप्रदेश-विपणनमण्डलात् दुग्धस्य अतिरिक्तं यवं, गोधूमं, मक्का इत्यादयः प्राकृतिक- कृषिपदार्थान् क्रेतुम् आह। सः अवदत् यत् राज्यसर्वकारः राज्ये प्राकृतिककृषिव्यवस्थां प्रवर्धयति। राज्यसर्वकारः प्राकृतिकरूपेण उत्पादितानां उत्पादानाम् न्यूनतमसमर्थनमूल्यं प्रदाति, तस्मात् स्थानीय अर्थव्यवस्थां वर्धयति।उत्तरभारतक्षेत्रस्य कमाण्डिंग जनरल ऑफिसर लेफ्टिनेंट जनरल् जी. डी. मिश्रा मुख्यमन्त्रिणं सूचितवान् यत् सेना अस्मिन् क्षेत्रे सेबप्रसंस्करणसंयंत्रं स्थापयिष्यति तथा च अस्मिन् वर्षे जूनमासे मोतियाबिन्दु- शल्यक्रियायाः चिकित्साशिबिराणां आयोजनं करिष्यति येन सीमाक्षेत्रेषु जनानां लाभः भवति।

# विश्वमधुमक्षिकादिनस्य सन्दर्भे 'पर्यावरणभारती' संस्थया वृक्षारोपणकार्यक्रमः सम्पन्नः



हिमसंस्कृतवार्ताः- अङ्कुश कुमारः, पटना। अस्य वृक्षारोपणकार्यस्य नेतृत्वं पर्यावरणप्रहरिणा शिवदानिप्रसादेन कृतम्। पतञ्जलियोगपीठस्य परिव्राजकः त्रिपुरारीलालः उक्तवान् यत्- "ग्लोबलवार्मिंग इत्यस्मात् जीवनरक्षार्थं प्रतिमानवेन स्वगृहेषु पञ्च वृक्षाः रोपणीयाः। देववृक्षाः चत्वारः एव। ते च पीपलः, वटवृक्षः, गूलरवृक्षः, पाकरवृक्षः च। एतेषां बीजानि सूक्ष्माणि सन्ति, परन्तु वृक्षाः विशालाः भवन्ति। अतः स्वजीवने कमपि पञ्च देववृक्षान् समारोप्य पूर्वजानां सम्मानं कुर्वीत। पूर्वजैः रोपितवृक्षैः एव अस्माकं प्राकृतिक- ऑक्सीजनं इति लभ्यते।" पर्यावरणभारत्याः संस्थापकः, 'पर्यावरणसंरक्षणगति-प्रान्तसंयोजकः, 'अखिलभारतीय- वृक्षोपक्रमदलसदस्यः रामबिलासशाण्डिल्यः उक्तवान् यत्- "वर्ष २००८ तः प्रारभ्य पर्यावरणभारती संस्था वृक्षारोपणयज्ञं सततं करोति। अद्यावधि १,२१,२१३ वृक्षाः रोपिताः सन्ति। आगामिनि ५ जून दिनाङ्के विश्वपर्यावरणदिने दशसहस्रवृक्षारोपणं कर्तुं लक्ष्यमस्ति।" सः अवदत्- "स्मरणदिनेभ्यः, यथा जन्मदिने, वार्षिकोत्सवे, पुण्यतिथौ, इत्यादिषु, वृक्षारोपणं कर्तव्यम्। वृक्षाः अस्माकं श्रेष्ठमित्राणि सन्ति। ते फलानि, पुष्पाणि, लाक्षा, औषधयः, काष्ठम्, च प्राकृतिक- ऑक्सीजनं निःशुल्कं ददाति। वृक्षच्छेदनस्य अतिरिक्ततया पृथिवी शीघ्रं तप्ता जायते। हिमनद्यः गलन्ति, औषधयः लुप्यन्ते, प्रदूषणं च वर्धते। अतः वृक्षारोपणेन एव मानवसंस्कृति, सभ्यता च रक्ष्येते।"
सः पुनः अवदत्- "२० मई २०१८ दिनाङ्के प्रथमं विश्वमधुमक्षिकादिवसः आचरितः। एषः दिनाङ्कः 'एण्टोनजनशा' इत्यस्य स्लोवेनियादेशीयस्य मधुमक्षिकापालनशिक्षकस्य जन्मतिथिः अस्ति। "मधुमक्षिकाः कृषकाणां हितकारिण्यः सन्ति। सर्वे मानवाः मधुनः सेवनं कुर्वन्ति। मधुमक्षिकाः परागणस्य माध्यमेन कृषेः उत्पादकत्वं वर्धयन्ति। वैज्ञानिकप्रगत्याः कारणेन एतासां संख्या न्यूना जाता। अतः प्रतिमानवेन प्रतिज्ञा कार्या यत् 'मधुमक्षिकाः रक्षितव्याः, पर्यावरणं संरक्षितव्यम्'।" "वर्ष २०२५ विश्वमधुमक्षिकादिनस्य विषयः अस्ति। 'प्रकृतेः प्रेरणया मधुमक्षिकाः अस्मान् पोषयन्ति'।""मधुमक्षिकाणां महत्त्वं सामान्यजनानां सन्दर्भे प्रचारणीयम्। एते पर्यावरणस्य रक्षकाः सन्ति, अतः एषां वासस्थानं संरक्षितव्यम्, जनानां च जागरूकता वर्धनीया।" एवं सुदिने वृक्षारोपणं स्मरणीयं कार्यं जातम्।अस्मिन् वृक्षारोपणकार्यक्रमे शिवदानिप्रसादः, त्रिपुरारीलालः, रामबिलासशाण्डिल्यः, समाजसेवकः प्रदीपकेशरी, प्रभुमोदी, राधेश्याममोदी, मनीषकुमारवर्णवालः, अंकितपण्डितः, सदनवर्णवालः, राजेन्द्रमोदी, अभियन्ता विवेककुमारवर्णवालः, प्रिन्सयादवः, रौनकयादवः, चन्द्रकान्तभगत् च सहभागीभूताः।


# प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत् भारतस्य स्वास्थ्य-परिष्कारः विकासयुतां संरचनां प्रस्तौति



हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी अष्ट-सप्तति-तमां विश्वस्वास्थ्य-महासभां प्रावोचत् यत् स्वस्थ-विश्वस्य भविष्यः समावेशे एकीकरणे सहयोगे च आश्रितो वर्तते। जिनेवायाम् आयोजितं सत्रम् दृश्याकङ्‌ माध्यमेन सम्बोधयन् तेनोक्तं यत् भारतस्य स्वास्थ्य-परिष्कारः समानताधारिताय विश्वायसतत् विकासयुतां संरचनां प्रस्तौति। श्रीमोदिना भारतस्य स्वास्थ्य-कल्याण-केन्द्राणां विशाल-तन्त्रम् अशीत्यधिक-पञ्चशत्-सहस्र-जनेभ्यः निशुल्कम् आयुष्मान भारत-स्वास्थ्यागोप-योजना प्रभृतिविषयाः उल्लेखिताः। प्रधानमन्त्रिणा स्वास्थ्य-अभिज्ञान-पत्र-दूरभाषिकौषध प्रणाली अपि रेखाङ्किते। याभिः चत्वारिंशदुत्तर-त्रिशत-सहस्राधिक-परामर्शाः सम्भवाः अभवन्। प्रधानमन्त्रिणा विश्वस्वास्थ्य-सङ्कटनस्य महामारी सन्धि-प्रगति प्रशंसिता। वैश्विक सहयोगाय भारतस्य प्रतिबद्धता च पुष्टीकृता।

# ।।खादिरः स्रुवः।।

वैदिकपात्राणां विषये सामान्यः निर्देशः विकङ्कतकाष्ठस्य विद्यते। स्रुवः खदिराश्रितो भवति। खदिरः कण्डकाकीर्णः वृक्षः प्रसिद्धः। अरत्निमात्रा दीर्घः अङ्गुष्ठपर्व प्रमाणेन वृत्तमुखः होमपात्रविशेषः स्रुवः। (स्रवति घृतादिकमस्मादिति स्रुवः)



# बिहारम्- उपमुख्यमन्त्रिणा कृषिमन्त्रिणा च विजयकुमारसिन्हेन राज्यस्तरीयायाः शारदीयकृषिकर्मशालायाः कृतम् उद्घाटनम्




**हिमसंस्कृतवार्ताः।** शारदीयस्य कृषिकालस्य वैज्ञानिककृषिपद्धतिषु विशेषबलम् प्रददता बामेति-सभागारे आयोजितायाम् राज्यस्तरीयायाम् शारदीयमहाभियान-कर्मशालायाम् माननीयः उपमुख्यमन्त्री-कृषिमन्त्री श्री विजयकुमारसिन्हा उद्घाटनं कृतवान्। अस्य कार्यक्रमस्य अध्यक्षता कृषिविभागस्य सचिवः श्री सञ्जयकुमारअग्रवालेन कृता।स्वभाषणे माननीयः उपमुख्यमन्त्री अवदत् यत् अधिकाधिकं सरलहिन्दीशब्दानां प्रयोगः करणीयः। एवं कृते कृषकाः अधिकारिभिः सहजतया सम्बद्धाः भविष्यन्ति। तेन एवमपि उक्तं यत् 'खरीफ' इत्यस्य स्थाने 'शारदीय', तथा 'रबी' इत्यस्य स्थाने 'वसन्तीय' इत्येतयोः शब्दयोः उपयोगः करणीयः।कार्यशालाया उद्देश्यः सम्पूर्णराज्ये शारदीयकालाय योजनानां वैज्ञानिकप्रणालीनां च सफलतया कार्यान्वयनस्य सुनिश्चितता अस्ति। राज्यसर्वकारः कृषकाणां आयवृद्धये, जलवायुनुकूलाय च टिकसां कृषिपद्धतेः कृते निरन्तरं प्रयत्नं करोति।शारदीयमहाभियानान्तर्गतं नवीनकृषितंत्रज्ञानस्य प्रचारप्रसारः कृषकाणां प्रति क्रियते। उन्नतानां प्रमाणितबीजानां समये वितरणं द्वारा उत्पादने उत्पादकत्वे च वृद्धिः लक्ष्यीक्रियते। मृदापरीक्षणं मृदास्वास्थ्यपत्रवितरणयोजना च विशेषं बलं दत्तम्। यतोहि कृषकाः स्वक्षेत्रस्य मृदानुसारं सन्तुलितम् उर्वरकं प्रयुञ्जते। तेन उत्पादनलागतं ह्रासः, गुणवत्तायाः च वृद्धिर्भवति। प्रत्यक्षप्रदर्शनकार्यक्रमैः कृषकाः वैज्ञानिकविधिना कृषौ प्रेर्यन्ते।Farmer Registry सम्बन्धे प्रोक्तं यत् सर्वे कृषकाः डिजिटलीकृताः सन्ति, यैः ते विविधसरकारीयोजनासु सम्मिलिता भवन्ति। जैविककृषिप्रोत्साहनयोजनायाः अन्तर्गतं प्रशिक्षणम्, प्रमाणीकरणम्, विपणनप्रणाली च व्यवस्थिताः सन्ति।जलवायुनुकूलकृषिक्रमस्य २०२५–२६ अन्तर्गतं सूखा-वा-प्रलयं प्रति सहिष्णवः बीजाः, समेकिताः कृषिपद्धतयश्च प्रोत्साह्यन्ते। कृषि-यन्त्रकरणयोजनया कृषियन्त्राणाम् उपलब्धता, कस्टमहायारिङ्ग केन्द्रस्य च स्थापनया उत्पादकता वर्धते।शारदीयमहाभियाने धानम्, संकरधानम्, मक्का, मोटाअन्नानि (मिलेट्स्), दलहनम्, तैलहनं च इत्येषां वैज्ञानिककृषौ विशेषबलं दत्तम्। कीट-रोगनियन्त्रणाय समेकिततंत्रज्ञानं अनुशंसितम्। सचिवः श्री सञ्जयकुमारअग्रवालः अपि अवदत् यत् शारदीयकाले समन्वितरूपेण सर्वैः विभागैः कार्यं करणीयम्। तकनीकीज्ञानं, उन्नतबीजाः, यन्त्रप्रणाली, जैविकपद्धतयः, डिजिटलीकरणं च कृषिक्षेत्रस्य आत्मनिर्भरता-संपन्नता च सिध्यन्ति।

**शारदीयमहाभियानस्य प्रमुखाः तिथयः—**

१९ मे २०२५ – माननीयमुख्यमन्त्रिणा शारदीयमहाभियानस्य उद्घाटनम्

२० मे २०२५ – राज्यस्तरीय कर्मशालायाः आयोजनम्

२२ मे २०२५ – जिलास्तरीय कर्मशालायाः आयोजनम्

२६ मे – ०१ जून – प्रखण्डस्तरीय प्रशिक्षण-सह-उपादानवितरणम्

०२ जून – २१ जून – सर्वपञ्चायतासु कृषकचौपालकार्यक्रमाः

रथेषु एल.ई.डी.वीथिषु कृषि-विषयक चलचित्रं प्रदर्श्यते। धानस्य सीधं बीजानं, 'Zero Tillage' इत्येतादृश्याः नवप्रणाल्यः दलहनीकृषिः, ड्रिप्-स्प्रिंकलर-सिंचनप्रणाली च प्रचार्यन्ते। धान्यावशेषदहनस्य निषेधाय रथेषु विशेषदृश्यचित्रं प्रदर्श्यते। फ्लेक्सी-पटिकाभिः विविधयोजनासु जनजागरणं च क्रियते। रथेषु ध्वनिप्रणाली च अनुवर्तते।

## मखानम् – "मा तु भोजनम्" – विजयकुमारसिन्हा

पट्नायां आयोजितायां मखानविषयक राष्ट्रस्तरीयायां संगोष्ठ्यां माननीयः उपमुख्यमन्त्री श्री विजयकुमारसिन्हा मखानं "मा तु भोजनम्" इति कथयन् तस्य पोषणीयं आर्थिकं च महत्त्वं प्रतिपादितवान्। एषा संगोष्ठी डॉ. राजेन्द्रप्रसादकेन्द्रीयकृषिविश्वविद्यालयेन, कृषि-अर्थशास्त्र-अनुसन्धान-संघेन्, I.F.P.R.I इत्यनेन च संयुक्ततया आयोजिता।तेन उक्तं यत् राष्ट्रस्य समग्रमखानोत्पादनस्य ८५% अंशः, च विश्वस्तरे ६०% अंशः च बिहारराज्यतः आगच्छति। राज्ये घोषितस्य मखानमण्डलस्य प्रभावः स्पष्टः दृश्यते। ५०,००० कृषकानां कृते ऋणसुविधा दास्यते। मखान-सिंघाडा, मखान-पान, मखान-मत्स्यचक्रकृषेः प्रोत्साहनं आवश्यकम्। तेन अपि उक्तं यत् मखानं न्यूनतमसमर्थनमूल्यस्य सूचीमध्ये योजनीयम्।

## ऑनलाइनमाध्यमेन संस्कृतकक्षा आरब्धा, संस्कृतमस्ती संस्कृतक्लासेस चेतयोः अभिनवः उपक्रमः




**हिमसंस्कृतवार्ताः- अङ्कुश कुमारः, पटना।** संस्कृतमस्ती, संस्कृतक्लासेस च इत्यनयोः सञ्चालकः सदाबहार चिन्टूकुमारेण ज्ञापितम् यत्- हिन्दूधर्मस्य प्रमुखाः धार्मिकग्रन्थाः यथा वेदाः, उपनिषदः, पुराणानि, महाभारतम् च अपि संस्कृतभाषायामेव लिखिताः सन्ति। हिन्दूनां पूजा-पाठानाम् धार्मिकसंस्काराणां च भाषा संस्कृतमेव अस्ति। संस्कृतसाहित्यं भारतीयसाहित्यस्य विशालं समृद्धं च भाण्डारम् अस्ति। ऋग्वेदः विश्वसाहित्यस्य आद्यं पुस्तकं अस्ति, यः संस्कृतभाषायाम् एव लिखितः। संस्कृतसाहित्ये दर्शनम्, विज्ञानम्, इतिहासः, कला, साहित्यञ्च प्रमुखा आयामाः समाविष्टाः सन्ति। संस्कृतभाषा भारतीयसंस्कृतेः ऐक्यसूत्रम् अस्ति। एषा भारतीयभाषानां संयोजिका अपि अस्ति। भारतीयसंस्कृतेः गम्भीरज्ञानाय संस्कृताध्ययनम् आवश्यकं भवति। एवं चिन्तयन् सदाबहार चिन्टूकुमारेण उद्घोषितम् यत् संस्कृतमस्ती, संस्कृतक्लासेस चेत्येतयोः माध्यमेन अधुना ऑनलाइनपद्धत्या संस्कृतकक्षा प्रारब्धा। कश्चन शिक्षार्थी यदि ऑनलाइनरूपेण संस्कृतं पठितुं इच्छति, सः कृपया +918271390947 इत्यस्मिन् दूरवाण्यां सम्पर्कं करोतु।

## Himachal News - आईबी-प्रमुखः तपन डेका द्वितीयवारं एकवर्षस्य सेवाविस्तारं प्राप्तवान्



हिमसंस्कृतवार्ताः - शिमला। केन्द्रसर्वकारेण आतङ्कवादविरोधिविशेषज्ञस्य गुप्तचरब्यूरो-निदेशकस्य तपनकुमारडेकावर्यस्य कृते च द्वितीयं एकवर्षस्य विस्तारः दत्तः। तपन डेका हिमाचलप्रदेशसंवर्गस्य १९८८ बैच-इत्यस्य भारतीयपुलिससेवायाः पदाधिकारी अस्ति ।प्रथमवारं २०२२ तमस्य वर्षस्य जूनमासात् २ वर्षाणां कार्यकालाय आईबीनिदेशकरूपेण नियुक्तः अभवत् तदनन्तरं २०२४ तमस्य वर्षस्य जूनमासस्य २४ दिनाङ्के निवृत्तेः पूर्वं एकवर्षस्य विस्तारः अपि दत्तः ।मन्त्रिमण्डलस्य नियुक्तिसमित्या मंगलवासरे कृते आदेशे गुप्तचरब्यूरोनिदेशकस्य तपन डेका इत्यस्य कार्यकालस्य एकवर्षस्य (जून २०२६ पर्यन्तं वा अग्रे आदेशपर्यन्तं) विस्तारः कृतः अस्ति इति अनुमतम्।सः २००८ तमे वर्षे मुम्बईनगरे २६/११ आतङ्कवादीनां आक्रमणानां समये प्रतिक्रियाणां प्रभारी आसीत्, भारतीयमुजाहिदीनां विरुद्धं अभियानस्य अपि नेतृत्वं कृतवान् । डेका इत्यस्य असमदेशस्य परिस्थितिनिवारणस्य अनुभवः अपि अस्ति, जम्मू-कश्मीरे संकटकाले सर्वकारस्य परामर्शकः अपि अभवत् ।